# त्रयोदशः पाठः

## चाणक्यचन्दनदासयोः संवादः

चन्दनदास : – (स्वगतम्)

चाणक्येऽस्मिन्नकरुणे सहसा शब्दायितस्य लोकस्य।
वर्धते निर्दोषस्यापि शङ्का, किं जातदोषस्य।।

तद्भणिता मया धनसेनप्रमुखास्त्रयो वाणिजका तथा 'कदापि चाणक्यहतको गेहं मे विचिनोति तदवहिता निर्वहत भर्तुः अमात्यराक्षसस्य गृहजनम् , मम तावत् यद्भवति तद्भवतु' इति।

शिष्यः – भोः श्रेष्ठिन् ! इत इतः।

चन्दनदासः – अयमागतोऽस्मि। (उभौ परिक्रामतः)

शिष्यः – उपाध्याय ! अयं श्रेष्ठी चन्दनदासः।

चन्दनदास – (उपसृत्य) जयतु जयत्वार्यः।

चाणक्यः – (नाट्येनावलोक्य) भोःश्रेष्ठिन्! स्वागतम्! इदमासनम् , आस्यताम्।

चन्दनदासः – (प्रणम्य) किं न जानाति आर्यः , यथाऽनुचित उपचारः परिभवादपि महद्दुःखमुत्पादयति, तद् इहैव अहमुचितायां भूमावुपविशामि।

चाणक्यः – भो श्रेष्ठिन्! मा मैवम् , उचितंमेवैतत् अस्मद्विधैः सह भवतः , तदुपविश्यतामासन एव।

चन्दनदासः – (स्वगतम्) उपलक्षितमनेन किमपि। (प्रकाशम्) यदार्य आज्ञापयति

चाणक्यः – भोः श्रेष्ठिन्! चन्दनदास। अपि प्रचीयन्ते सव्यवहाराणां वृद्धिलाभाः वः ?

चन्दनदासः – (स्वगतम्) अत्यादरः शङ्कनीयः। (प्रकाशम्) आर्य! अथ किम् आर्यस्य प्रसादेन अखण्डिता मे वाणिज्या।

चाणक्यः – भोः श्रेष्ठिन्! अपि कदाचित् चन्द्रगुप्तदोषा अतिक्रान्तपार्थिवगुणान् अधुना स्मारयन्ति प्रकृतीः ?

चन्दनदासः – (कर्णौ पिधाय) शान्तं पापम् , शारदनिशासमुद्गतेनेव पूर्णिमाचन्द्रेण चन्द्रश्रियाऽधिकं नन्दन्ति प्रकृतयः।।

शब्दार्थ : शब्दायितः–आकारितः–बुलाया गया । ज़ातदोषः–कृतापराधः–जिसपर दोषारोपण हुआ हो । हतकः–दुष्टः, घातुकः–'हत्यारा' के अर्थ में गाली विचिनोति–अन्वेषणं करोति–खोजबीन कराता है । परिभवादपि–अपमानात् अपि–अपमान से भी (अधिक) । उपलक्षितम्–दृष्टं किमपि लक्षणम्–कुछ लक्षण देख लिया ।



सरलार्थ :

**चन्दनदास–** (अपने मन में)
चाणक्य ने जिस पर दोषारोपण किया है, बुलाया गया है । ऐसे में निर्दोष के मन में भी शंका उत्पन्न होती है और जो दोषी है उसमें होना तो स्वाभाविक ही है । इस बात को मुझे धनसेन आदि तीन व्यापारियों ने कहा है । कभी भी हत्यारा चाणक्य आमात्य राक्षस के गृहजन की खोजबीन कर सकता है । तब तक मेरा जो होना है, हो।

**शिष्य–** हे श्रेष्ठिन् ! इधर-इधर !

**चन्दनदास–** यह मैं आया (दोनों घूमते हैं)

**शिष्य–** आचार्य, यह श्रेष्ठी चन्दनदास हैं ।

**चन्दनदास–** (पास जाकर) आर्यपुत्र की जय हो ।

**चाणक्य–** (अभिनय की मुद्रा में देखते हुए) श्रेष्ठिन्, स्वागत है, यह आसन है बैठें ।

**चन्दनदास–** (प्रणाम कर) क्या आर्य पुत्र नहीं जानते हैं कि अनुचित व्यवहार अपमान से भी अधिक दुःखदायी होता है, अतः यहीं नीचे भूमि पर बैठना ही अच्छा है ।

**चाणक्य–** हे श्रेष्ठिन् ! ऐसा नहीं करें । मेरे साथ ही आसन पर बैठें । यही उचित है ।

**चन्दनदास–** (अपने मन में) इन्होंने कुछ लक्षण देख लिया है क्या । (बोलता है) जैसी आर्यपुत्र की आज्ञा ।

**चाणक्य–** हे श्रेष्ठिन् ! चन्दनदासं । व्यापार में वृद्धि हो रही है न ।

**चन्दनदास–** (अपने मन में) अत्यधिक आदर शंका उत्पन्न कर रहा है । (स्पष्ट रूप में बोलकर) आपकी कृपा से व्यापार अखण्डित है ।

**चाणक्य–** हे श्रेष्ठिन ! चन्द्रगुप्त के दोष कभी राजा के गुणों का स्मरण दिलाते हैं ।

**चन्दनदास–** (दोनों कान बन्दकर) पाप की शान्ति हो । शरद् ऋतु की रात में उदित चन्द्रमा पूर्णिमा के दिन प्रकृति की शोभा में वृद्धि ही करता है ।

चाणक्यः – भोः श्रेष्ठिन्! यद्येवं, प्रीताभ्यः प्रकृतिभ्यः प्रियमिच्छन्ति राजानः।

चन्दनदासः– आज्ञापयतु आर्यः, किम् अर्थजातमस्माज्जनादिष्यत इति।

चाणक्यः – भोः श्रेष्ठिन्! चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्, यतो नन्दस्यैवार्थरुचेरर्थसम्बन्धः प्रीतिमुत्पादयति, चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव।

चन्दनदासः – (सहर्षम्) आर्य! अनुगृहीतोऽस्मि।

चाणक्यः– भोःश्रेष्ठिन् ! स चापरिक्लेशः कथमाविर्भवतीति न पुनः प्रष्टव्याः स्मो भवता ?

चन्दनदासः– आज्ञापयत्वार्यः।
चाणक्यः– संक्षेपतो राजनि अविरुद्धाभिर्वृत्तिभिर्वर्त्तितव्यम्।
चन्दनदासः– आर्य! कः पुनरधन्य आर्येणावगम्यते ?
चाणक्यः – भवान् एव तावत् प्रथमः।

**शब्दार्थ : प्रीताभ्यः**–प्रसन्न। **प्रतिप्रियम**–उपकार के बदले। **अपरिक्लेशः**–दुःख का अभाव। **अर्थसम्बन्धः**–धन का सम्बन्ध। **प्रष्टव्याः**–पूछने योग्य। **अवगम्यते**–जाना जाता है।

**सरलार्थ :**

**चाणक्य–** हे व्यापारी ! प्रसन्न स्वभाव वाले राजा उपकार के बदले की इच्छा रखते हैं।
**चन्दनदास–** आर्य आज्ञा दें, मुझ सदृश व्यक्ति के लिए क्या आदेश है।
**चाणक्य–** हे व्यापारी ! यह चन्द्रगुप्त का राज्य है, नन्द का राज्य नहीं। नन्द को ही धन की रूचि थी, उसे ही धन से था। चन्द्रगुप्त को तो आपके लिए दुःख का अभाव है।
**चन्दनदास–** (प्रसन्नतापूर्वक) आर्य ! मैं अनुगृहित हूँ।
**चाणक्य–** हे व्यापारी ! वह दुःख रहित कैसे होता है, आपसे वही पूछने योग्य है।
**चन्दनदास–** आज्ञा दें श्रीमान्।
**चाणक्य–** राज्य का व्यापार अविरोध बढ़े।
**चन्दनदास–** श्रीमान् ! कौन अभागा राजा के विरुद्ध है, ऐसा आप अनुभव करते हैं ?
**चारणक्य–** सर्वप्रथम आप ही हैं।

चन्दनदासः– (कर्णौ विधाय) शान्तं पापं, शान्तं पापं, कीदृशस्तृणानामग्निना सह विरोधः ?
चाणक्यः– अयमीदृशो विरोधो, यत् त्वमद्यापि राजापथ्यकारिणोऽमात्यराक्षसस्य गृहजनं स्वगृहमभिनीय रक्षसि।
चन्दनदासः– आर्य! अलीकमेतत्, केनापि अनार्येण आर्यस्य निवेदितम्।
चाणक्यः– भोःश्रेष्ठिन्! अलमाशङ्कया, भीताः पूर्वराजपुरुषाः पौराणामनिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति, ततस्तत्प्रच्छादनमेव दोषमुत्पादयति।
चन्दनदासः– एवं नु इदम्। तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजनः

**शब्दार्थ : राजापथ्यकारिणः**–राजाओं का अहित करने वाले। **अलीकम्**–झूठ। **अनार्येण**–दुष्ट के द्वारा। **पौराणाम्**–नगर के लोगों के। **निक्षिप्य**–रखकर। **व्रजन्ति**–जाते हैं। **प्रच्छादनम्**–छिपाया जाना।

**सरलार्थ :**

**चन्दनदास–** (दोनों कान बन्द कर) पाप शान्त हो; पाप शान्त हो–घास और आग के साथ विरोध कैसे ?
**चाणक्य–** यह विरोध इस प्रकार है कि तुम आज भी राजा का अहित करने वाले आमात्य (मन्त्री) राक्षस के परिवार को अपने घर में रखे हुए हो।
**चन्दनदास–** झूठ है श्रीमान ! किसी दुष्ट के द्वारा ही आप से कहा गया है।
**चाणक्य–** हे व्यापारी ! शंका करना व्यर्थ है। पहले के भयभीत राजपुरुष भी नगर के लोगों के चाहने पर ही उनके घर में अपने परिवार के लोगों को रखकर दूसरे देश को जाते थे, उसे ही छिपाया जाना दोष कहते है।
**चन्दनदास–** ऐसी बात नहीं है। उस समय मेरे घर में आमात्य राक्षस के गृहजन थे।

चाणक्यः– 'प्रथमम् अनृतम्, इदानीम् आसीदिति परस्परविरोधिनी वचने।
चन्दनदासः– एतावदेवास्ति मे वाक्छलम्।
चाणक्यः– भोः श्रेष्ठिन्! चन्द्रगुप्ते राजनि न परिग्रहः छलानां तत् समर्पय राक्षसस्य गृहजनमच्छलं भवतु भवतः।
चन्दनदासः– आर्य! ननु विज्ञापयामि– 'तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन' इति।
चाणक्यः– अथ इदानीं क्व गतः ?
चन्दनदासः– न जानामि कुत्र गत इति।
चाणक्यः– (स्मितं कृत्वा) कथं न ज्ञायते नाम ? भोःश्रेष्ठिन्। शिरसि फणी दूरे तत्प्रतीकारः। अन्यच्च नन्दमिव विष्णुगुप्तः (अर्धोक्तौ लज्जां नाटयति)
चन्दनदासः– उपरि घनं घनरटितं दूरे दयिता किमेतदापतितम्।
हिमवति दिव्यौषधयः शीर्षे सर्पः समाविष्टः।।
चाणक्यः– चन्द्रगुप्तममात्यराक्षसः समुच्छेत्स्यतीति मैवं मंस्थाः।
पश्य–

विक्रान्तैर्नयशालिभिः सुसचिवैः श्रीर्वक्रनासादिभि –
र्नन्दे जीवति, या तदा न गमिता स्थैर्यं चलन्ती मुहुः।
तामेकत्वमुपागतां द्युतिमिव प्रह्लादयन्तीं जगत्
कश्चन्द्रादिव चन्द्रगुप्तनृपतेः कर्तुं व्यवस्येत् पृथक्।।

चन्दनदासः– (स्वगतम्) फलेन सम्पादितं शोभते ते विकत्थितम्।
चाणक्यः– राजा अपथ्यकारिषु तीक्ष्णदण्डः। न मर्षयिष्यति राक्षसकलत्रप्रच्छादनं भवतः, तद् रक्ष परकलत्रेण आत्मनः कलत्रं जीवितं च।
चन्दनदासः– आर्य! किं मे भयं दर्शयसि ? सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि, किं पुनरसन्तम्।

चाणक्यः– चन्दनदास! एष ते निश्चयः ?

चन्दनदासः– वाढ़म् एष मे स्थिरो निश्चयः।

चाणक्यः– (स्वगतम्) साधु चन्दनदास । साधु:

सुलभेष्वर्थलाभेषु परसंवेदने जनः।
क इदं दुष्करं कुर्यादिदानीं शिविना विना।।

शब्दार्थ : फणी–सर्पः–साँप । प्रतीकारः–रक्षोपायः–बचने का साधन । मंस्थाः(मन्+लुङ)–मन्यस्व –मान लो । विक्रान्तैः–बलशालिभिः–पराक्रमियों द्वारा । प्रह्लादयन्ती–प्रसादयन्ती–प्रसन्न करने वाली । व्यवस्येत्–उद्यमं कुर्यात्, –प्रयास कर सकता है । विकत्थितम्– आत्मप्रशंसा–बड़बोलापन । तीक्ष्णदण्डः–कठोर दण्डदाता–कड़ी सजा देने वाला ।

सरलार्थ :

**चाणक्य–** पहले 'झूठ' इस समय 'था' यह परस्पर विरोधाभासात्मक वचन ।

**चन्दनदास–** यही मेरी झूठी वाणी है ।

**चाणक्य–** हे श्रेष्ठि ! चन्द्रगुप्त के राज्य में छल-कपट नहीं है अतः राक्षस के परिवार को समर्पित करें ।

**चन्दनदास–** आर्य निश्चय ही कहता हूँ उस समय मेरे घर में राक्षस का परिवार था ।

**चाणक्य–** अब इस समय कहाँ गया ।

**चन्दनदास–** नहीं जानता हूँ कि कहाँ गया ।

**चाणक्य–** (हँसकर) कैसे नहीं जानते हो ? हे श्रेष्ठिन् सिर पर सर्प का दूर से प्रतिकार । क्या नन्द के समान विष्णुगुप्त (आधा कहते हुए लज्जा का अभिनय करता है)

**चन्दनदास–** ऊपर में घनघोर मेघ है और प्रियतमा दूर है, यह कैसे आ पड़ा। हिमालय के दिव्य औषधियों के ऊपर जैसे सर्प बैठा हो ।

**चाणक्य–** चन्द्रगुप्त का आमात्य राक्षस नुकसान कर सकेगा ऐसी बात मन में मत लाना ।

**चन्दनदास–** (अपने मन में) फल से ही आत्मप्रशंसा प्रकट होगा ।

**चाणक्य–** राजा के अकल्याण करने वालों को कड़ी सजा दी जाती है । यदि तुम राक्षस के परिवार को नहीं सौंपते हो तो अपने परिवार को दूसरों के परिवार के लिए नष्ट कर दोगे ।

**चन्दनदास–** आर्य ! मुझे भय दिखाते हैं । आमात्य राक्षस के परिवार को घर में रहते हुए भी मैं समर्पित नहीं कर सकता हूँ, नहीं रहने पर क्या ?

**चाणक्य–** यही तुम्हारा निश्चय है ?

**चन्दनदास–** बहुत अच्छा, यही मेरा निश्चय है ।

**चाणक्य–** धन्यवाद ! चन्दनदास धन्यवाद ।



धन का लाभ सुलभ रहने पर दूसरों के कल्याण के लिए त्याग देना, ऐसा सुदुष्कर कार्य राजा शिवि के अतिरिक्त भला कौन कर सकता है ?

## व्याकरणम्

समासः

अखण्डिता – न खण्डिता (नञ् तत्पुरुषः)। चन्द्रगुप्तनृपतिः चन्द्रगुप्तनामा नृपतिः (मध्यमपदलोपी ) । तीक्ष्णदण्डः – तीक्ष्णः कठोरः दण्डो यस्य सः (बहुव्रीहिः ) । अर्थलाभेषु – अर्थस्य लाभः (षष्ठीतत्पुरुषः) , तेषु । राक्षसकलत्रप्रच्छादनम् (षष्ठीतत्पुरुषः)।

सन्धिः

चाणक्योऽस्मिन्नकरुणे = चाणक्ये + अस्मिन् + अकरुणे । आगतोऽस्मि = आगतः + अस्मि । जयत्वार्यः = जयतु + आर्यः । नाट्येनावलोक्य = नाट्येन + अवलोक्य । भूमावुपविशामि = भूमौ + उपविशामि । मैवम् = मा + एवम् । यद्येवम् =यदि + एवम् । अस्माज्जनादिष्यते = अस्मात् + जनात् + इष्यते । आविर्भवतीति = आविः + भवति + इति । अविरुद्धाभिर्वृत्तिभिर्वर्तितव्यम् = अविरुद्धाभिः + वृत्तिभिः + वर्तितव्यम् । राजापथ्यकारिणोऽमात्यराक्षस्य = राजापथ्यकारिणः + अमात्यराक्षसस्य । पुनरधन्यः = पुंनः + अधन्यः । कीदृशस्तृणानाम् = कीदृशः + तृणानाम् । ततस्तत्प्रच्छादनम् = ततः + तत् + प्रच्छादनम् । आसीदस्मद्गृहे = आसीत् + अस्मत् + गृहे । एतावदेवास्ति = एतावत् + एव + अस्ति । यदाज्ञापयत्युपाध्यायः = यत् + आज्ञापयति + उपाध्यायः । सुलभेष्वर्थलाभेषु = सुलभेषु + अर्थलाभेषु

## अभ्यासः

1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत–

i. चन्दनदासः कः आसीत् ?
ii. चाणक्यः कः आसीत् ?
iii. अस्मिन् पाठे चाणक्यः किम् इच्छति स्म ?
iv. अमात्यराक्षसः स्वगृहजनं कुत्र निक्षिप्य गतः ?
v. चन्द्रगुप्तः कः आसीत् ?

उत्तराणि–

i. चन्दनदासः पाटलिपुत्रस्य एकः श्रेष्ठी आसीत् ।
ii. चाणक्यः चन्द्रगुप्तस्य गुरु महान् कुटनीतिज्ञः आसीत् ।
iii. अस्मिन् पांठे चाणक्यः राक्षसं चन्द्रगुप्तस्य अमात्य रूपेण नियोक्तुम् इच्छति स्म ।
iv. अमात्यराक्षसः स्वगृहजनं चन्दनदास गृहे निक्षिप्य गतः ।
v. चन्द्रगुप्तः नन्दवंश विनाशकः गुप्त साम्राज्यस्य संस्थापकः आसीत् ।

2. अधोलिखितेषु वाक्येषु कोष्ठकात् समुचितं पदम् आदाय रिक्तस्थानानि पूर्यन्ताम् –

i. एष में स्थिरो .................... । (निश्चयम्, निश्चयः)

ii. तस्मिन् समये आसीदस्मद् ............ अमात्यराक्षसस्य गृहजनः । (गृहस्य , गृहे)

iii. न जानामि स कुत्र .............. । (गतः , गतम्)

iv. तद् रक्ष ................ आत्मनः कलत्रं जीवितं च । (परकलत्रेण , परकलत्रस्य)

v. यद्येवं प्रीताभ्यः ............. प्रियमिच्छन्ति राजानः । (प्रकृतिः , प्रकृतिभ्यः)

उत्तराणि–

i. एष में स्थिरो निश्चयः ।

ii. तस्मिन् समये आसीदस्मद् गृहे अमात्यराक्षसस्य गृहजनः ।

iii. न जानामि स कुत्र गतः ।

iv. तद् रक्ष परकलत्रेण आत्मनः कलत्रं जीवितं च ।

v. यद्येवं प्रीताभ्यः प्रकृतिभ्यः प्रियमिच्छन्ति राजानः ।

3. निम्नलिखितेषु वाक्येषु कोष्ठाङ्कितानां पदानाम् उचितविभक्तौ प्रयोगः क्रियताम् –

i. .............. राक्षसस्य गृहजनः कुत्र अस्ति ? (अमात्य)

ii. ............ समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजनः(तत्)

iii. कीदृशः तृणानाम् ............ सह विरोधः ? (अग्नि)

iv. न मर्षयिष्यति राक्षसकलत्रप्रच्छादनं ...........। (भवत्)

v. सः अति ........... कार्यं करोति (दुष्कर)

उत्तराणि–

i. अमात्यस्य राक्षसस्य गृहजनः कुत्र अस्ति ?

ii. तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजनः ।

iii. कीदृशः तृणानाम् अग्निना सह विरोधः ?

iv. न मर्षयिष्यति राक्षसकलत्रप्रच्छादनं भवतः।

v. सः अति दुष्करं कार्यं करोति ।

4. सन्धिविच्छेदं कुरुत –

कश्चन्द्रादिव, भूमावुपविशामि, जयत्वार्यः, यदाज्ञापयत्युपाध्यायः, सुलभेष्वर्थलाभेषु

उत्तराणि–

कश्चन्द्रादिव–कः + चन्द्रात् + इव



भूमावुपविशामि–भूमौ + उपविशामि

जयत्वार्यः–जयतु + आर्यः

यदाज्ञापयत्युपाध्यायः–यत् + आज्ञापयति + उपाध्यायः

सुलभेष्वर्थलाभेषु–सुलभेषु + अर्थलाभेषु

5. निम्नलिखितानाम् शब्दानां प्रकृति–प्रत्यय–विभागं कुरुत –

प्रणम्य, उपसृत्य , प्रष्टव्यः , कृत्वा , कर्तुम्।

उत्तराणि–

प्रणम्य–प्र + नम् + ल्यप्

उपसृत्य–उप + सृ + ल्यप्

प्रष्टव्यः–प्रच्छ् + तव्यत्

कृत्वा–कृ + क्त्वा

कर्तुम्–कृ + तुमुन्

6. अधोलिखितानाम् शब्दानां रिक्तस्थानेषु प्रयोगं कुरुत –

शोभते, उपचारः, गृहजनम्, चन्दनदासः, अनार्येण

i. श्रेष्ठी .............. अत्र आगतः ।

ii. अनुचित ................. परिभवादपि महद्दुःखमुत्पादयति ।

iii. समर्पय राक्षसस्य ........... अच्छलं भवतु भवतः।

iv. अलीकमेतत् , केनापि ............ आर्यस्य निवेदितम्।

v. फलेन सम्पादितं ............. ते विकत्थितम्।

उत्तराणि–

i. श्रेष्ठी चन्दनदासः अत्र आगतः ।

ii. अनुचित उपचारः परिभवादपि महद्दुःखमुत्पादयति ।

iii. समर्पय राक्षसस्य गृहजनम् अच्छलं भवतु भवतः।

iv. अलीकमेतत्, केनापि अनार्येण आर्यस्य निवेदितम्।

v. फलेन सम्पादितं शोभते ते विकत्थितम्।

7. अधोलिखितेषु पदेषु प्रयुक्ताः धातवः प्रत्येकं पदस्य समक्षं लिख्यन्ताम्–

| | पदम् | धातु |
|---|---|---|
| i. | अस्ति | ... |
| ii. | वर्त्तितव्यम् | ... |
| iii. | उपविश्यताम् | ... |
| iv. | अवलोक्य | ... |

v. जयतु ...
vi. भवति ...
vii. कर्तुम् ...
viii. रक्षसि ...
ix. व्रजन्ति ...
x. उत्पादयति ...

उत्तराणि–

| | पदम् | धातु |
|---|---|---|
| i. | अस्ति | अस् |
| ii. | वर्त्तितव्यम् | वृत् |
| iii. | उपविश्यताम् | उप + विश् |
| iv. | अवलोक्य | अव + लोक् |
| v. | जयतु | जि |
| vi. | भवति | भू |
| vii. | कर्तुम् | कृ |
| viii. | रक्षसि | रक्ष् |
| ix. | व्रजन्ति | व्रज् |
| x. | उत्पादयति | उत् + पद् |

## वस्तुनिष्ठ प्रश्नोत्तर

✦ अधोलिखितानां प्रश्नानां समुचितम् उत्तरं प्रदत्तेषु विकल्पेषु चित्वा लिखत–

**1. चाणक्यचन्दनदासयोः सम्वादः कस्मात् ग्रन्थात् संकलितः ?**
(क) मुद्राराक्षसात् (ख) मृच्छकटिकात्
(ग) उत्तररामचरितात् (घ) बालरामायणात् **उत्तरम्–(क)**

**2. मुद्राराक्षसस्य रचयिता कः ?**
(क) शूद्रकः (ख) विशाखदत्तः
(ग) भारविः (घ) भासः **उत्तरम्–(ख)**

**3. राक्षसः कः आसीत् ?**
(क) चन्द्रगुप्तस्य आमात्यः (ख) पाटलिपुत्रस्य नरेशः
(ग) नन्दवंशस्य आमात्यः (घ) सूर्यवंशस्यामात्यः **उत्तरम्–(ग)**

**4. पाटलिपुत्रस्य श्रेष्ठी कः आसीत् ?**
(क) राक्षसः (ख) चन्द्रगुप्तः
(ग) चाणक्यः (घ) चन्दनदासः **उत्तरम्–(घ)**

**5. चाणक्यः राक्षसं कस्य अमात्यं कारयितु वाञ्छति ?**
(क) चन्द्रगुप्तस्य (ख) नन्दवंशस्य
(ग) पाटलिपुत्रस्य (घ) मगधस्य **उत्तरम्–(क)**

**6. उत्पादः शंकनीयः इति कः चिन्तयति ?**
(क) चाणक्यः (ख) चन्दनदासः
(ग) शिष्यः (घ) राक्षसः **उत्तरम्–(ख)**

**7. चन्दनदासस्य गृहे कस्य स्वजनाः निक्षिप्ताः आसन् ?**
(क) शिष्यस्य (ख) चाणक्यस्य
(ग) राक्षसस्य (घ) नन्दवंशस्य **उत्तरम्–(ग)**

**8. शिवि कः आसीत ?**
(क) निष्ठुर राजा (ख) विवेकी आमात्यः
(ग) संतोषी राजा (घ) परोपकारी राजा **उत्तरम्–(घ)**